॥श्रीगणेशायनमः॥जयंतिपितपादाब्जरेणवोयत्प्रसादतः॥भक्तिप्राप्तातदन्याघ्रमोहाभावश्च
पंडिते॥१॥मंत्रोपासनवैदिकतांत्रिकदिक्षार्चनादिविधिभिर्यः॥श्रमस्तोरमतेनिजजनकेषुस
मेलेषुसर्वस्वम्॥२॥ननुकिमिदंदुर्वलतरमिवोच्यते॥सत्यमदुर्वलतममपिबुधूःकृपपतितजनेकस
दृग्गोचारणंनतुविदुषाम्॥दुर्वलमेवानेकप्रमाणसिध्यत्वात्॥तथाहि॥आयमात्माप्रवचनेनल
भ्योनमेधयानबहुनाश्रुतेनयमेवैषवृणुतेतेनलभ्यस्तस्यैषआत्मावृणुतेतनूंस्वामितिसामान्योक्त्यापि
श्रुतिर्विशेषेणभगवद्वरणीकारमात्रेकलभ्यत्वोक्त्याप्रवचनादिपरमात्मीयत्वेनभगवद्वरणीका
रंतिरिक्तयावत्साधनोपजप्यकाणीतिज्ञायते॥तेनजीवकृतिसाध्यसाधनैरप्राप्यत्वमुक्तंभ
वति॥दुर्वलजीवगतोत्कर्षेऽपिप्रयोजकत्वंचिवरणोक्त्यायथाकन्यास्वाभिमतमेवपतिंस्वेन
वृणुतेवरोवातादृशीमेवकन्यांस्वस्त्रीत्वेनातथाभगवान्स्वदासत्वेनात्मीयत्वेनांगीकरो
तीत्युच्यते॥तथाचयथातदनंतरमन्यत्रविनियोगस्तस्यास्तथैतस्यापीतिज्ञापितंभवति
॥दुर्वलेऽपिज्ञातुमशक्यमित्यपि॥एवंसतिविहितक्रियाफलत्वेनस्वर्गादिवदपिनतथा॥

THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY LIBRARY

Bhakti Hansa (8 leaves)

अतः परमिदादिबदुद्देशत्वेन तत्रैवोद्दिष्यते तत्रापि वदामः। तथाहि। सर्वस्मवत्री सर्वस्मे
त्यादिश्रुतिस्मृतिभ्यो देवो वा मनुष्यो वा यक्षो गंधर्व एव वा॥ भजन्मुकुंदचरणं स्वस्तिमान्स्या
द्यथावयं॥१॥ कोनुराजन्निंद्रियवान्मुकुंदचरणाब्जयम्॥ भजन्नेश्वर्तोभक्तपुरुषस्यममरो
त्तमैः॥२॥ मोहिपार्थव्यपाश्रित्यये पिस्युः पापयोनयः॥ स्त्रियो वैश्यास्तथा शूद्रास्तेपियां
तिपरांगतिम्॥३॥ इत्यादिस्मृतिभ्योश्रजीवमात्रस्यभगवान्पतिरितिस्त्रियास्वपतिभ
जनवज्जीवमात्रस्यभगवद्भजनमिष्टसाधनत्वेनस्वीकार्यंसर्वथातच्छ्रवणादिरूपं। ए
वंसतिभगवानिवतन्नामादिकमपिसर्वान्प्रत्यवश्यमिष्टमितिमंतव्यम्। मंत्रशास्त्रेतुनिगद्यु
ते॥ राममंत्रस्तदधिष्ठातृभजनंकस्यचिन्मित्रंकस्यचिदरिःकस्यचिन्निधंकस्यचिन्नाधमि
त्यादि। एवमेवगोपालादिमंत्रास्तदधिष्ठातृभजनानिचेति। एवंसतितदधिष्ठातृरूपस्यपु
रुषोत्तमरूपत्वेपूर्वोक्तश्रुतिस्मृतिन्यायेनसर्वान्प्रतिभजनीयत्वेनावश्यमेष्टव्यमेतत्तथे
त्यन्यथानुपपत्त्यैवतत्पुरुषोत्तमस्यविग्रहरूपंनित्यमेवेतिमंतव्यम्। ननुविहितप्र

कारेणभजनेहिसर्वस्यापीष्टमतोनानुपपत्तिःकाचिदितिचेदुच्यते॥ यानास्थायनरोराजन्न
प्रमाद्येत्कर्हिचित्॥ धावन्निमील्यवानेत्रेनपतेन्नस्खलेदिहेतिवाक्येभगवधर्मास्थितिमा
त्रेणैवभगवत्प्राप्त्यर्थमर्च्यार्चनसाधनपरित्यागेनाश्वमुरुक्रमंघनेपिफलविलंबःफला
भावोवानभवतीतिनिरूप्यते। आस्थितिस्तुकायवाङ्मनसांतदीयत्वं। एवंसतिमंत्रोपासनाया
अपियद्भगवधर्मत्वंस्यात्तदातत्सरत्वमात्रेणैवयस्यकस्यचिदिष्टमेवफलंभवेन्नस्वल्पथा। न
नुसर्वेषुवर्णेषुतथाश्रमेषुनारीषुनानाद्रव्यभक्तेषु। तदाफलानामभिलषितानांप्राग्वगोपा
लकमंत्रएवश्रेष्ठादिवावात्। सर्वाजीष्टत्वंगोपालमंत्रोपासनायामस्तीतिनोक्तरूपतेतिचे
त्सत्यमस्तिसर्वाजीष्टत्वंनतत्तद्रूपतोपासनामार्गीयत्वात्। नहिकर्मांगत्वेनक्रियमाणस्यभ
गवत्स्मरणस्यभक्तिरूपत्वंवक्तुंशक्यंकर्ममार्गीयत्वात्। अपरंच। तत्रवाराहनादिवर्ज्यकर
णादिकंफलत्वेनश्रूयते। नहिपुरुषोत्तमभक्तैस्तत्कर्तुंमर्हत्यनर्थरूपत्वात्। अनर्थो
परामर्शसाक्षाद्भक्तियोगमधोक्षजे॥ तस्मान्निरस्तविषयोभक्तिर्निरपेक्षस्यमेनवेदिसादिबाकरवि
रोधात्॥ अतएवश्रुतिप्रतिष्ठापितश्रौत्रास्मार्तनमस्कारनिषेधोधर्मशास्त्रेयुज्यते। यः

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

श्रद्दध्यापितेलिंगविष्णुवाविनमेद्विजः॥मयातिनरकंघोरंयावदाहूतसंप्लवम्॥नहिब्राह्म
णानामीश्वरोनमस्यःक्वचित्॥किंपुनर्ब्राह्मणाःपुण्याःस्तिवाक्यात्॥किंचमंत्राधीनत्वंत
त्तद्देवतायाउच्यतेपुरुषोत्तमस्तु॥नरोध्यतिमांयोगोनसांख्यंधर्मएवच॥नस्वाध्यायस्त
पस्त्यागोनेष्टापूर्त्तंनदक्षिणा॥७॥व्रतानियज्ञाःछंदांसितीर्थानियमायमाश्च॥नाहंवेदै नि
र्नतपसानदानेननचेज्यया॥शक्यएवंविधोद्रष्टुंदृष्टवानसिमांयथा॥नत्वात्वनन्ययाशक्य
अहमेवंविधोनृप॥ज्ञातुंद्रष्टुंचतत्त्वेनप्रवेष्टुंचपरंतप॥तादृवार्जुनयमात्मेत्याद्युक्तमु
त्वाचनमंत्रोपासनाधीनप्रतिमहद्वैलक्षण्यम्॥अहंभक्तपराधीनोह्यस्वतंत्रइवद्विज॥सा
धुभिर्ग्रस्तहृदयोभक्तैर्भक्तजनप्रियः॥नाहमात्मानमाशासेमद्भक्तैःसाधुभिर्विना॥श्रियं
चात्यंतिकींब्रह्मन्येषांगतिरहंपरा॥येदारागारपुत्राप्तान्प्राणान्वित्तमिमंपरम्॥हित्वा
मांशरणंयाताःकथंतांस्त्यक्तुमुत्सहे॥मय्यनिर्बंधहृदयाःसाधवःसमदर्शिनः॥वशेकुर्व
तिमोभक्त्यासत्स्त्रियःसत्पतिंयथा॥सादृभिःस्वंदेवत्वमृषित्वंवासुरात्मनाः॥
प्रीणनायमुकुंदस्यनहत्तंनबहुज्ञता॥नदानंनतपोनेज्यानचशौचंनव्रतानिच॥श्रीय

२

तेमज्जयाभक्त्याहरिरन्यद्विडंबनमित्यादिभिः॥भक्त्याहमेकयाग्राह्यः॥भक्त्यातुतोषभगवान्
गजयूथपायेत्यादिवाक्यसहस्रैर्भक्तिमात्रसाधनत्वोक्तेश्च॥ततोविलक्षणएवपुरुषोत्तमे
वध्येयं॥अनुमंत्रैरपिभगवदीयत्वात्तत्संबंधिसर्वभक्तिरूपमेवेतिनोक्तानुपपत्तिरितिचेत्
॥हंतेदंपाटुरमत्सानीयमेवश्रुतस्कंमित्याभाणकमनुहरति॥ननुकथमेवमित्थंश्रीम
द्भुधवरेणयदुवंशोदयाचलचूडामणिना॥एजामार्गमिरूप्यप्रतिष्ठयासार्वभौमंसप्तना
मुवनत्रयंश्रद्धादिनाब्रह्मलोकंत्रिभिर्मर्त्यादित्यादिप्रंथैकसमुदायात्मोक्षजनेरंनिरू
प्यमामेवनैरपेक्ष्येणभक्तियोगेनविंदतीत्यादिभक्तियोगंसजातएवंयःपूजयेतमामितिनिरू
पितम्॥अत्रपूर्वार्धएवकारेणपूर्वोक्तफलव्यवच्छेदपूर्वकंस्वस्यभक्तियोगफलमुक्तमितिफ
लभेदादपिस्वरूपभेदज्ञायतेवउत्तरार्धेचपूजायाःसाधनत्वंभक्तेश्चफलत्वंचेतिस्पष्ट
एवपूजादेर्भक्तेर्भेदाः॥भगवत्स्वरूपातिरिक्तफलकेकर्मज्ञानेषुनभक्तित्वम्॥भक्तेश्च
भक्तस्वरूपातिरिक्तफलकत्वमतोनपूजादिर्भक्तिरितिनिरूपणार्थमेवमामेवेत्यादिनिरूपित
मितिवेदितव्यं॥अन्यथापूजाप्रकरणेतन्निरूपणमसंगतंस्यात्॥यत्कर्मभिर्यत्तपसाज्ञान

वैराग्यतश्चयत्।योगेनदानधर्मेणश्रेयोभिरितरैरपि।सर्वंमद्भक्तियोगेनमद्भक्तोलभतेंज
सेतिभक्तिसाध्येनान्येनसिध्यति।अन्यसाध्यंभक्तेरानुषंगिकमितिकथनार्थकत्वतरू
स्थभावत्वज्ञापकायनायचोक्तं।अन्येस्वर्गापवर्गैमधामकथंचिद्यदिवांछतिरतिवचनात्।
तेनभक्तिरेवकार्यानान्यदितिफलितंभवति।।दानव्रततपोहोमजपस्वाध्यायसंयमैः।।श्रे
योभिर्विविधैश्चान्यैःकृष्णेभक्तिर्हिसाध्यतइतिवाक्यात्।।नमंत्रजपादेर्भक्तित्वेनभगवदर्थमे
वकृताभगवत्प्राप्तिर्नविष्यतीत्याशंकानिरासायोक्तार्थेतारतम्यापास्तस्यास्तसाधनत्वमु
क्तं।अन्यथाकृष्णादिनेत्यादिविरोधःस्यात्।एतेनलोकेशास्त्रेवाक्वचित्तारतम्यांतस्यांभक्तिपद
प्रयोगौपचारिकइतिज्ञापितं।नचमामितिपदेनकृष्णायाअपिविषयःपुरुषोत्तमएवे
तिवाच्यम्।विग्रहिरूपस्यापिभगवद्रूपत्वात्पुरुषोत्तमत्वेबाधकमुक्तमेवमंत्रशास्त्रमिसा
हिना।अन्यफलानुसंधानरहितपूर्वकंभगवद्भावनायांपुरुषोत्तमावेशोप्यंतःकरणेपू
र्तेचभवतीतिज्ञापनायवामामितिमुक्तम्।।अतएवभक्तिस्तथाफलिष्यति।यमेवैषवृणुते
इतिश्रुतेस्तथैवतद्वरणात्।अत्राधिकारेनेदेनकृष्णाफलत्वेहेत्वायमेवेतिश्रुतौकर्मज्ञा

२

नभक्तिपुष्टिःश्लोकेफलार्थिप्रवृत्तिरनुपपन्नेत्यनुपपत्तिर्निरस्तावेदितव्या।।कर्मादिविधिषुविवि
धफलश्रवणात्तत्तत्फलरागवान्तत्रतत्रयतिष्यतइत्युपपत्तेः।नन्वेवंपुरुषोत्तमार्थिप्रव
त्त्यनुपपत्तिः।मैवं।तदर्थित्वसेवबरणकार्यात्।अन्यथातदनुपपत्तेः।वरणंचास्तिप्रकार
द्वयं।मर्यादापुष्टिभेदेन।आद्यस्तत्साधनेनवस्तिप्रवृत्तः।तथैवतद्वरणात्।परंतुस्नेहो
त्पत्तिपर्यंतंविधिरेवतत्रप्रयोजकस्तदुत्पत्त्यनंतरंचरागादेवतत्संबंधिपदार्थेयतिष्य
तेरतिविधेरप्रयोजकत्वम्।द्वितीयस्तुप्रवृत्तिप्रवृत्तौअप्रयोजिकेप्रभुणास्वसेवसाध
नत्वेनांगीकारात्।अतएव।अद्भुतंतंनिशम्यायानमतिश्रमेणेतिगोकुलविशेषणंहि
तीयस्कंधेब्रह्मणोक्तमितिसर्वमवदातंकिंचविष्णुविषयकत्वेनेवभक्तिस्वेकमार्गत्वेन
क्रियमाणविष्णुस्मरणादेरपिभक्तित्वापत्तिःकर्ममार्गीयत्वान्नतथाप्रवोक्तन्यायेनवि
ष्णुरूपासेवविष्णोःस्मरणादेस्तत्रविहितत्वान्नतथाकर्ममार्गेभगवद्भूतीनामेवेत्य
त्वात्।अतएवरासस्थंचिकीर्षुणाधर्मरासेनप्रभुंप्रतिविज्ञापितं।यत्सेविष्यतीर्नवतस्त
लंपादयनःप्रभोरितिअन्यथासाक्षाद्धरिंविज्ञापयस्वामिसेवबदेत्।एतेनभगवद्दिछा

यांसस्यामेवभक्तस्यकर्मकरणे।तत्रचोक्तानांदेवानांतद्विभूतित्वेनैवयाग।अन्यथाऽन
न्यत्वभंगप्रसंगेतिसूचितम्।अपरंच।तत्तदुपासकस्यतत्तत्कामफलंदेवान्
देवयजोयांतीतिवाक्यात्।यंयंवापिस्मरन्भावंत्यजत्यंतेकलेवरं।तंतमेवैतिकौंतेय
सदातद्भावभावितइतिवचनात्।एवंचसत्येकादशस्कंधेअस्मत्प्रसूतेः।केवलेनहिभ
क्तेनगोप्योगावःखगामृगाः।येमेसद्धियोनागाःसिद्धामामीयुरंजसेतिमहताग्रंथे
नगोकुलवासिनांस्वप्राप्तिनिरूपणंयत्नयोगेनसांख्येनदानव्रततपोध्वरैः।।व्रतवास्वा
ध्यायसंन्यासैःप्राप्नुयाद्यत्नवानपीतीतरसाधनवत्प्राप्यस्वरूपनिरूपणमितिभक्त
तिरिक्तसाधनप्राप्यपुरुषोत्तमस्वरूपमितिनिश्चीयते।गीतासूचपार्थेनएवंस
ततंयुक्तायेभक्तास्त्वांपर्युपासते।।अथयापरयोपेतास्तेमेयुक्ततमामताःइतिभक्ति
मार्गीयोपासनस्यज्ञानमार्गादुत्कर्षमुक्त्वायेत्वक्षरमित्यादिनाज्ञानमार्गाणामपकर्षमु
क्त्वाभगवानितिनज्ञानमार्गस्यापिपुरुषोत्तमविषयत्वं।अत्रतेप्राप्नुवंतिमामेवेत्य
क्षरस्यापिपुरुषोत्तमाधिष्ठानत्वेनतद्विभूतिरूपत्वान्मामित्युक्तं।नचाक्षरमेवपुरु

षोत्तमइतिवाच्यम्।कूटस्थोक्षरउच्यते।उत्तमःपुरुषस्त्वन्यः।अक्षरादपिचोत्तमइतिभग
वद्वचनात्।कर्ममार्गेप्येवमेवत्रेयस्तथाहि।यामिमांपुष्पितांवाचंप्रवदंत्यविपश्चितः।।
वेदवादरताःपार्थनान्यदस्तीतिवादिनइत्यादिनात्रैविद्यामांसोमपाःपूतपापायज्ञै
ष्टास्वर्गतिंप्रार्थयंते।।तेपुण्यमासाद्यसुरेंद्रलोकमश्नंतिदिव्यादिविदेवभोगान्।।तेतंभु
क्त्वास्वर्गलोकंविशालंक्षीणेपुण्येमर्त्यलोकंविशंति।।एवंत्रयीधर्ममनुप्रपन्नागतागतं
कामकामालभंतेइत्यादिभगवद्गीतासु।श्रीभागवतेच।अथयोरहमेधीयान्धर्मानेवा
वसन्गृहे।।काममर्थंचधर्मान्स्वान्नोऽधिक्रयःपिपर्त्तितान्।सचापिभगवद्धर्मान्काममू
ढःपराङ्मुखः।।यजंतेक्रतुभिर्देवान्पितॄंश्चश्रद्धयान्वितइत्यादि।येत्विहासक्तमनसः
कर्मसुश्रद्धयान्विताः।।कुर्वंत्यप्रतिषिद्धानिनित्यान्यपिचकृत्स्नशः।।रजसाकुलमनसः
कामात्मानोऽतितेंद्रियाः।।पितॄन्यजंत्यनुदिनंगृहेषभिरताशयाः।।त्रैवर्गिकास्तेपुरुषाविमुखा
हरिमेधसः।।कथायांकथनीयोरुविक्रमस्यमधुद्विषइत्यादिनाज्ञायस्त्रीयश्रुतिरतीय
मार्गप्रवेशोनिरूपितइति।ननुनवविधभक्तावर्चनस्याप्युक्तत्वात्कथंनरज्ञायास्तथा

त्वमितिचेन्नावशात्।श्रवणादिनवकमप्यधिकारिजनेनक्रियमाणंसत्कर्मज्ञानोपासना
भक्तिमार्गीयत्वेनानेकविधंभवतितथाहि।श्रीभागवतसहस्रनामादिश्रवणकीर्तनयोः
फलत्वेनहिचत्वारोप्यर्थाउच्यंते।तत्रत्रिवर्गकामेनक्रियमाणःश्रवणादिःकर्ममार्गीयए
व।।तत्रप्यर्थेहृषिनिर्विहितत्वेनकृतश्चेत्तदासतथा।।इतरर्थेचेत्कृषिवत्लौकिकएव।
सुधस्तुशौचार्थिगंगास्नेवज्ञानहितस्यमज्जनेहतिरिक्तोधर्मउत्पद्यते प्रत्युतनि
षिध्याचरणात्पापमपि।एतेनविहितज्ञातीयकर्मयथाकथंचित्कृतंमुक्तिफलायेतिनि
रस्तं।तुरीयाश्रमेज्ञानादेर्हेतुश्चित्तशुद्धिहेतुत्वेनक्रियमाणःश्रवणादिर्ज्ञानमार्गीयः।
यथायथात्मापरिस्पृश्यतेसोमसुएपगाथाश्रवणाग्निधानेरित्यादिवाक्यैःसाक्षान्मोक्षसाध
नत्वेनतांत्रिकदिक्षापूर्वकंविहितत्वेनक्रियमाणश्रवणादिरूपउपासनामार्गीयः।अ
यमेववैष्णवमार्गइत्युच्यतेविष्णुधर्मेष्वेवनिष्ठत्वात्।मुक्तिसाधनत्वप्रतिपादकवा
क्यैरेवमसीयते।अर्चायामेवहरयइत्यादिवाक्यानामयमेवविषयः।भक्तिमार्गीयक

तज्ञानंसांप्रदायिकदिक्षापूर्वकंमोक्षसाधनत्वेनक्रियमाणःश्रवणादिःप्रावाहिकीभक्तिरु
च्यते।अतएवकपिलदेवेन।।नयुष्मदानयाभक्त्याभगवत्यरिलात्मनि।।सदृशोस्तित्रिवर्ग
यायोगिनांब्रह्मसिध्येरन्सुपक्रमाःसतांलक्षणमुक्तंतएतेसाधवःसाधुभिर्मार्गसंगविव
र्जिताः।।संगस्तेष्वथतेप्रार्थ्यःसंगदोषहराहिते।।सतांप्रसंगान्ममावीर्यसंविदोभवंतिहृ
त्कर्णरसायनाःकथाः।।तज्जोषणादाश्वपवर्गवर्त्मनिश्रद्धारतिर्भक्तिरनुक्रमिष्यतीसा
दिनिरूपितम्।।अत्रापवर्गवर्त्मनीतिपरेनोक्तरूपत्वमवधेयम्।।प्रेमात्मकभक्तिसाध
नत्वेनक्रियमाणःश्रवणादिभक्तिमार्गीमर्यादाभक्तिरित्युच्यते।।अथामृतकथायांमे
ऽनुपक्रम्।एवंधर्मैर्मनुष्याणांसुधवात्मनिवेदिनां।।मयिसंजायतेभक्तिःकोन्योर्थोस्या
वशिष्यते।।भक्त्यासंजातयाभक्त्योसादिवावैस्तसाधकत्वंतेयस्तेहोत्तस्यनंतरंस्वयस
नतःस्वतंत्रपुरुषार्थत्वेनक्रियमाणउत्तमःपुष्टिभक्तिरूपः।।मत्सेवयाप्रतीतंचसाजो
क्यादिचतुष्टयं।।नेछंतिसेवयापूर्णाःकुतोन्यत्कालविप्लुतम्।।नैकात्मतांमेस्पृहयंतिकेचि
न्मत्सादसेवाभिरतामदीहाः।।

महतांमधुद्विट्सेवानुरक्तमनसा

मभवोपिफलम्॥नारायणपरालोकेनकुतश्चिद्बिभेति॥स्वर्गापवर्गनरकेष्वपितुल्या
र्थदर्शिनइत्यादिवाक्यैस्तथात्वंतेयंतेनभक्तिपदस्यभक्तिःस्नेहएव॥श्रवणादिषुतधेतुत्वे
नतत्प्रयोगाभावात्॥अतएव॥सालोक्यसार्ष्टिसामीप्यसारूप्येकत्वमप्युतदीयमानंनगृह्णंति
विनामसेवनंजनाइतिलक्षणमुक्तासएवभक्तियोगाख्यइतिलक्षणमुक्तं॥अन्यथा॥
आख्यापदमनर्थकंस्यादेवकारश्च॥एवंसतिएवंविधेषूपचारिकोभक्तिपदप्रयोगइति
ज्ञापितंभवति॥स्नेहवशेनक्रियमाणास्तेस्नेहमधपातिनएव॥अथवासाक्षात्पुरुषोत्त
मप्रापकत्वेनविहितत्वेभक्तिपदप्रवृत्तिनिमित्तंश्रवणादिषुभिन्नं॥नचैतत्प्रापकत्व
मेवतथेतिवाच्यंद्वेषादेर्भगवदनुग्रहस्यभक्तित्वापत्तेः॥नचसाक्षात्परमनर्थकंविभू
तिभजनकर्तुरपितद्वारातत्प्राप्तेः॥यथाऽग्निभवानद्युःपतंभाएरितावितो॥विश्वतो
सर्वतःसिंधुंतद्वत्वांगतयोंततस्त्वादिप्रमाणसिद्धत्वेनतद्वारकत्वात्॥अतएवस्नेह
त्वमेवंफलरूपायांतस्यांतन्निमित्तमित्यनेकार्थेभक्तिशब्दः॥प्रवृत्तिनिमित्तभेदेपिरवि
वंड्योःपुष्पवच्छब्दवाच्यत्वमेकस्यामेवोक्तौयथातथाक्वचिद्भक्तिपदंभक्त्याद्याह्वयत्सा

दिषूभयवाचकमपिउक्तरूपतानुसारेणैवनैरपेक्ष्येणभक्तियोगेनवैदृतीत्यादिभिः॥एवं
सतत्युक्तायेभक्तास्त्वांपर्युपासते॥येचाप्यक्षरमव्यक्तमितिपार्थप्रश्नेनैतदुत्तरेणच॥
नाऽहंद्विजमित्युपक्रम्य॥प्रीयतेमलयाभक्त्याहरिरन्यद्विडंबनमितिप्रह्लादवाक्येन॥न
रोधयतिमांयोगइत्यादिश्रीमन्मुखोक्तवाक्यैर्भक्त्याहमेकयाग्राह्यइत्यादिवाक्यसहस्रैः॥
अत्रभक्तावबधार्यते॥मंत्रार्थिज्ञानंपुरुषोत्तमविभूतिरूपत्वेपूर्वमुपपादितमिति
तत्प्रापकतज्ज्ञपादैर्जुनादेर्भक्तिमत्त्ववक्तुंश्रवणंभक्तिसाधनत्वोक्तेश्च॥एवंसतिभ
क्तिमार्गीयभजनप्रकारेषुस्नेहएवनियामकःस्नेहवतां॥कर्मणिविधिवत्॥तद्रहिता
नांतुतद्रूक्तउपदेशएव॥सचवेदादिविरुद्धएवेतिज्ञेयंविधिमजानतांबालेनपि
त्रादिरिक्षयाकृतसंध्यावंदनादेःकर्मत्ववदुपदेशानुसारेणकृतेरपिभक्तित्वेनभा
गीयत्वात्॥एवंरूपस्यास्नेहोवश्यंभावीतिज्ञेयं॥यथातादृग्बालकृतकर्मणोप्युत्फ
लंसाधकत्वंतथार्तदृप्तजनस्यापिपुरुषोत्तमप्रापकंमितिकिमन्यदवशिष्यते॥आ
धुनिकानामुपदेष्टृणामपिस्नेहाभावेपितन्मूलभूतानामाचार्याणांतद्भावेनभगवद्

त्व

त्व

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

नुगृहीतत्वेनसर्वोपपत्तेः॥स्वानुगृहीतभक्त्यप्रवर्त्तितत्वेनयतस्तन्मार्गेपक्षपातोभगवतः॥अतए
वश्रीभागवतेव्रह्मादिवाक्ये॥स्वयंसमुत्तीर्यसुदुस्तरंद्युमन्भवार्णवंभीममदभ्रसौहृदाः॥भ
वत्पदांभोरुहनावमत्रतेनिधाययाताःसदनुग्रहोभवान्॥इति॥अत्रभगवत्सदांभोजस्यभ
क्तिमार्गत्वेनतद्रूपस्यसंप्रदायप्रवर्त्तनमेवतन्निधानं॥तत्प्रवर्त्तितसंप्रदायेप्रवृत्तानांतार
तम्यसाधनाभावेपिसाक्षादनुगृहीतेषुपक्षपातेनतत्संबंध्यनुग्रहंकरोतीत्यभिप्रायेणोक्तं
सदनुग्रहइति॥सत्स्वनुग्रहोयस्येत्यर्थः॥॥अस्मिन्नर्थेप्रमाणंचभगवत्संमतिरेवरक्षि
ता॥॥भवदित्यनेन॥तत्संप्रदायस्यानांतरीणस्वरूपंनावायनौत्वनिरूपणं॥तेनानायासेनभ
वाब्धितरणंसूचितं॥बहुभांतरणेह्यायासेनावातरणेनतथाऽत्यंतसर्वविधरणेपित
थरणेविरक्तमितिनात्रलिख्यते॥भगवद्भजनेपरमियंव्यवस्था॥अग्निहोत्रादीनांप्रत्विछं
ज्ञात्वायदानुष्ठानंतदायथाकथंचित्रमेव॥एतेनाग्निहोत्रित्वेनांधपरंपरात्वशंकानिर
स्ताप्रमाणसिध्यत्वात्॥प्रेमाश्रुफलत्वेनस्वरूपसाध्यत्वेनचनविहितत्वंसंभवति॥किंतु ७

तस्मानुवादएव॥यएतस्मिन्महाभागाःप्रीतिंकुर्वंतिमानवाः॥महात्मतानपूर्वस्तुकरु
दःसर्वतोधिकः॥स्नेहोभक्तिरितिप्रोक्तस्तयामुक्तिर्नचान्यथा॥तृतीयस्कंधेच॥देवानां
लिंगनामानुश्राविककर्मणामित्यादिना॥मनुष्यश्रुतिमात्रेणेत्यादिना॥साधनरूपाश्रवणा
दिजन्यातु॥तस्माद्भारतसर्वात्माभगवान्हरिरीश्वरः॥श्रोतव्यःकीर्तितव्यश्चस्मर्त्तव्यश्चे
ष्टताभयमित्यादिवाक्यैर्विधीयतएवेतिसर्वमनवद्यमिति दिक्॥उपास्तिमन्यंतेमधुमथन
भक्तिंनिजहृत्तार्थतांतत्रोपसंपरमपुरुषंचापिरुविदः॥हयोःसारूप्याद्भमहतिकृतेमा
नसगतंमुदाभक्तेहंसप्रगदमकरादिद्रुजरुती॥१॥ग्रहानिचरणंमुदाशरणमेहिकामु
निरस्त ष्मिकंनिजसंश्रयोयइहनाग्यवद्भिःस्मृतः॥व्रजेशसुतपादपंकजपरागरागांचितंक
रोतिसततंहिमांनिजतनूजवाक्संयतः॥इतिश्रीमद्गोपीश्वरैकतानश्रीविठ्ठलवि
रचितोभक्तिहेमःसमाप्तः॥ ॥श्रीरस्तु॥ ॥कल्याणमस्तु॥